A VERSE ASCRIBED TO PAKṢADHARA MIŚRA

By K. Madhava Krishna Sarma

Among all the languages of the world Sanskrit with its innumerable roots affords the widest scope for the science of interpretation. From the ancient Brāhmaṇas down to many recent works, we have this literary technique developed in all its aspects. No. 8888 in the Anup Sanskrit Library is a commentary by one Nandīśa on a verse ascribed to Pakṣadhara Miśra. It gives twelve different interpretations of the verse and shows that the author or rather the commentator is a speculative genius. The MS. has only these folios. According to a scribal note at the end it was copied for Anup Singhji when he was Maharajkumar. There is no evidence to identify the commentator Nandīśa. I give the verse and the commentary here, as these are found in the MS.

अविदितसुखदुःखमिति पद्यस्य व्याख्या ॥

अविदितसुखदुःखं निर्गुणं वस्तु किञ्चिज्जडमतिरिह कश्चिन्मोक्ष इत्याचचक्षे ।
मम तु मतमनङ्गस्मेरतारुण्यघूर्णन्मदकलमदिराक्षी नीविमोक्षो हि मोक्षः ॥
इदं हि पक्षधरमिश्राणां पद्यं शिष्टैर्यथाश्रुतार्थकं नादरणीयं किं त्वेवम् ॥

अविदित सुखदुःखं निर्गुणं सत्त्वरजस्तमोलक्षणगुणातीतं किञ्चिद्वस्तु नैयायिकाभिमते ईश्वररूपं ध्यातं तन्मोक्षे हेतुरिति कश्चिज्जडमतिराचचक्षे । मम तु मतं हि मोक्षः हिमवच्छुभ्रः । उक्षो यस्यास्तीति हिमैः शीतैस्तोयैरुक्ष उक्षणं यस्येति वा हिमोक्षः । शिव एव मोक्षैकहेतुः । कीदृशः । अनङ्गस्मेरता अङ्गविकारो यस्य अनूरुत्वात् । ईदृशो य अरुण एव आरुण्यः तेन घूर्णन् भ्रमन् सूर्यः मदकलामदिनोमदवन्तश्चकोरादयो यस्मात्स मदकलमदी चन्द्रः रः अग्निश्च एते अक्षालोचनानि यस्येति । पुनः किं विशिष्टः शिवः । नियां नेतॄणां भक्तानां विमोक्षो यस्मादिति प्रथमोऽर्थः ॥ १ ॥

यद्वा पूर्वार्धं पूर्ववत् । उत्तरार्धं तु मम तु मतं अहेः कालियस्य मोक्षो यस्मादित्याहिमोक्षः कृष्ण एव ध्यातः सन्मोक्ष हेतुः । कीदृशः कृष्णः । अनङ्गस्य प्रद्युम्न रूपस्य स्मेरं यत्तारुण्यं तेन घूर्नन् विकसन्मदकलमदिरवदक्षोऽस्यास्तीति । पुनः कीदृशः । नियः सनकादीन् विं गरुडं मां लक्ष्मीं च उक्षतीति नीविमोक्षः । इति द्वितीयोऽर्थः ॥ २ ॥

यद्वा अविदित सुखःदुःखं निर्गुणं अशेषविशेषगुणशून्यं जडं साधनाभावात् ज्ञान-शून्य मतिः रि रायमतिक्रान्तं ह इति स्फुटम्। ईदृशं जीवात्मरूपं वस्तु यत्र भवति स मोक्ष इति कश्चित्तार्किक आचचक्षे। मम तु वेदान्तिनो मतमन स्मेरतारुण्यघूर्ण-न्मदकलमदिराक्षीनीविमोक्षेण ऊहोऽस्यास्तीति स चासौ मोक्षश्च। एतस्यानन्दस्या-न्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेरिति तृतीयोऽर्थः ॥ ३ ॥

यद्वा सर्वं सुगममेव। मदिराक्षीनिवितो मोक्ष एव मोक्ष इति वैराग्योपदेशः। तदाह मनुः—भोगाद्वैराग्यजननं वैराग्याद्विनिवर्तते। ततः कर्मानुपचयः क्रमान्मुक्तिः प्रजायते ॥ इत्यनेन भोगस्यापि मोक्षे कारणत्वमिति चतुर्थोऽर्थः ॥ ४ ॥

यद्वा न विदिते सुखदुःखे यत्र तत् सुखस्य तदात्मकत्वेन तद्धर्मत्वाभावात् निर्गुणं किञ्चित्तदेव वस्तु परमार्थरूपं कः ब्रह्मा चिता मोक्षो ज्ञानशून्य इति हेतो-राचचक्षे। मम तु वैष्णवस्य मतं अनङ्गस्मेरतारुण्यघूर्णन्मदकलमदिराक्षीणां गोपीनां नीविमोक्षो यस्मादिति अहिमोक्षः कालियमोक्षकर्ता कृष्ण एव वस्तु इति पञ्चमोऽर्थः ॥ ५ ॥

यद्वा अविदितसुखदुःखं निर्गुणं किञ्चित्तदेव वस्तु। इह ईदृशे वस्तुरूपे मोक्षे जडेषु अनात्मसु आत्मत्वेन या मतिः जडमतिः प्रतिबन्धिका इति कश्चिदाचचक्षे। मम तु मतं अनङ्गस्मेरताण्रुयेन घूर्णन्तो ये मदकला मत्ताः कामिनः मदिरा मद्यं च एतैर्युक्तः अक्षी कलिरेव मोक्षे हेतुः प्रतिबन्धक इति। कीदृशः कलिः। अहिमोक्षः मोक्षस्याहिरिवाहिः। राजदन्तादित्वात्पूर्वत्वमिति षष्ठोऽर्थः ॥ ६ ॥

यद्वा कश्चित्तु निर्गुणं ब्रह्म मोक्षे हेतुरिति मम तु गाणेशस्य मतम्। हिमैस्तुषार-वारिभिरुक्षतीति हिमोक्षो गणेश एव मोक्षहेतुः। कीदृशो गणेशः। अनङ्गे उत्तमाङ्गे स्मेरता विकासो यस्य गजाननत्वात्। अथ चारुण्येन सिन्दूरपूरेण घूर्णन् अथ च मदेन कलः अथ च मदिरायुक्तः अक्षोऽस्यास्तीति। अथ च नीविस्थले मदमोक्षो यस्येति सप्तमोऽर्थः ॥ ७ ॥

यद्वा निर्गुणं ब्रह्म मोक्षे हेतुरित्याचचक्षे। मम तु सौरस्य मतं-अहिमैः करै-रुक्षतीति अहिमोक्षः सूर्य एव मोक्षे हेतुः। कीदृशः सूर्यः। ईषदर्थे नञ्। ईषदङ्गे स्मेरता विकासो येषां ते अनङ्ग स्मेरताः। आरुण्येन घूर्णन्तो मदयुक्ताः कलमाः शालयस्तान् ददति ये मेघास्ते विद्यन्ते यस्य ईदृशो यो रस्तेजस्तद्युक्तोऽक्षोऽस्यास्तीति नियां शूराणां विमोक्षो येन यथा सतीति विमोक्ष इत्यष्टमोऽर्थः ॥ ८ ॥

यद्वा कश्चिन्निर्गुणं ब्रह्म मोक्षे हेतुरित्याचचक्षे। ममतु शाक्तस्य मतं अनङ्ग स्मेरतारुण्यघूर्णन्मदकलमदिराक्षी दुर्गैव मोक्षे हेतुः। हि यतः नयति मरणजन्मनीति

नीर्माया तया विमोक्ष एव मोक्षः। स तु तत्कृपयैव परं स्यादिति। तदुक्तम्—आराधिता सैव नृणां भोगस्वर्गापवर्गदा॥ इति नवमोऽर्थः॥ ९॥

यद्वा कश्चिद्वः युष्माकं जडमतिरस्ति इति हेतोरविदित सुखदुःखं निर्गुणं किञ्चिन्मोक्ष इत्याचचक्षे। मम तु निर्मलमतियुक्तत्वान्मतं तत्त्वं आचचक्षे। किं तन्मतं तदाह—हि यतः अनङ्गस्मेरतारुण्यघूर्णन्मदकलमदिराक्षी नीविमोक्ष एव मोक्षः। यतो नीविमोक्षस्यैव प्रारब्ध कर्मक्षयद्वारा मोक्षहेतुत्वं तत्त्वमिति दशमोऽर्थः॥ १०॥

यद्वा न विदिते सुखदुःखे येन वीरत्वात् सः। तं प्रति निर्गुणं किञ्चिद्वस्तु मोक्ष इति कश्चिज्जडमतिराचचक्षे। मम तु मतं अविदित सुखदुःखं वीरं प्रति अनङ्गस्मेरतारुण्येन घूर्णन्ति ओं काय इति शब्दायन्ते ये मदका वीरास्तान् लान्ति या मदिराक्ष्य उर्वश्यादयः तासां नीविमोक्ष एव मोक्षः इत्येकादशोऽर्थः॥ ११॥

प्रार्थनापक्षः कश्चिज्जडमतिः अविदितसुखदुःखं निर्दयं निर्गुणं तेजस्वितोद्धतादि गुणशून्यत्वं प्रभुं मां लक्ष्मीं उक्षति दानार्थं सिञ्चतीति मोक्षः। दातेतिकृत्वा किञ्चिद्वस्तु आचचक्षे ययाचे। मम तु मतमभिमतं हे राजन् त्वमुक्ष सिञ्च पूरयेति यावत्। अनङ्गेन स्मेरं तारुण्यं यस्येति नृपसंबोधनम्। यद्वा न अङ्गेषु स्मेरता प्रकाशो येषां तेऽनङ्गस्मेरतामूर्खविप्रास्तेष्वारुण्यं कोपरक्तत्वं यस्येति। कीदृशस्त्वम्। मदस्य कला येषां ते मदकला मल्लाः। मद्यं अक्षः पाशकश्च विद्येते येषां ते मदिराक्षिणः। घूर्णन्तो विकला मदकलमदिराक्षिणश्च यस्येति सः। हे नीविमनियो नेतृन्विशेषेण मातीति। पुनः कीदृशस्त्वम्। ऊहिमोक्षः ऊहस्तर्को येषां ते ऊहिनः पण्डिताः। तेभ्यो मामुक्षतीति द्वादशोऽर्थः॥ १२॥

श्लोकं विस्पष्टमाचष्टे नन्दीशो द्वादशार्थकम्।
प्रसिद्धिरेषा जगति जायतामजनिर्मम॥
इति अविदित सुखदुःखमिति पद्यस्य व्याख्या॥